## अवेः कः । (२८/२००६)

अविशब्दात् स्वार्थे कः प्रत्ययो भवति । अविरेव अविकः ॥

## यावादिभ्यः कन् । (२९/२००७)

याव इत्येवमादिभ्यः[1] स्वार्थे कन्प्रत्ययो भवति । याव एव यावकः । मणिकः ।

याव । मणि । अस्थि[2] । चण्ड । पीत । स्तम्ब । 'ऋतावुष्णशीते' (ग. सू. १४४) । 'पशौ लूनवियाते' (ग. सू. १४५) । 'अणु निपुणे' (ग. सू. १४६) । 'पुत्र कृत्रिमे' (ग. सू. १४७) । 'स्नात वेदसमाप्तौ' (ग. सू. १४८) । 'शून्य रिक्ते' (ग. सू. १४९) । 'दान कुत्सिते' (ग. सू. १५०) । 'तनु सूत्रे' (ग. सू. १५१) । 'ईयसश्च' (ग. सू. १५२) । श्रेयस्कः । ज्ञात । 'कुमारीक्रीडनकानि च' (ग. सू. १५३) । यावादिः ॥

## लोहितान्मणौ । (३०/२००८)

लोहितशब्दात् मणौ वर्तमानात् स्वार्थे कन्प्रत्ययो भवति । लोहितो मणिः [3]लोहितकः[4] । मणौ इति किम् ? लोहितः[5] ॥

## वर्णे चानित्ये । (३१/२०९९)

अनित्ये वर्णे वर्तमानात् लोहितशब्दात् स्वार्थे [6]कन्प्रत्ययो भवति । लोहितकः कोपेन । लोहितकः पीडनेन । अनित्ये इति किम् ? लोहितो गौः । लोहितं रुधिरम्[7] ।

[६३०] लोहितात्लिङ्गबाधनं वा[8] वक्तव्यम् । (म. भा. २.४३३)

लोहितिका कोपेन । लोहिनिका कोपेन ॥

## रक्ते । (३२/२१००)

लाक्षाविना रक्ते यो लोहितशब्दः, तस्मात् कन्प्रत्ययो भवति । लोहितकः कम्बलः । लोहितकः पटः । लिङ्गबाधनं वा इत्येव[9], लोहितिका, [10]लोहिनिका शाटी ॥

## कालाच्च । (३३/२१०१)

'वर्णे चानित्ये' (५.४. ३१/२०९९), 'रक्ते' (५.४.३२/२१००) इतिद्वयमप्यनुवर्तते । कालशब्दात् अनित्ये[11] वर्तमानात् रक्ते च कन्प्रत्ययो भवति । कालकं मुखं वैलक्ष्येण । रक्ते – कालकः पटः । कालिका [12]शाटी ॥

---

1. प्रातिपदिकेभ्यः इत्यधिकम् ब. क. 2. तालु मिता लोष्ट इत्यधिकम् फ. 3. लोहितिकः फ. 4. मणिः इत्यधिकम् क. 5. गौ इत्यधिकम् क. 6. कन् नास्ति क. 7. लोहितः पर्वतः इत्यधिकम् ब. ड. 8. इति इत्यधिकम् क. 9. वक्तव्यम् इत्यधिकम् फ. 10. उदाहरणमिदं नास्ति क. 11. वर्णे इत्यधिकम् क. ड. 12. पटी फ.